# संस्कृत भाषाया: महत्त्वम्

**डॉ०देवेन्द्र पाल**

सर्वेषाम् देशवासिनां कापि भाषा अस्त्येव परंच देवभाषा, अमरवाणी, सुरभारती, गीर्वाणवाणी, अमर- गिरा इत्यादिभि: नामभि: संस्कृतम् एव निगद्यते। "संस्कृतम् नाम दैवीवागन्वाख्याता महर्षिभि:" कथनमिदं संस्कृतस्य देवत्वं प्रतिपादयति।

पुरा भारतीया: जना: संस्कृत भाषया व्यवहरन्ति स्म। इयम् लोकानाम् भाषा आसीत्।न केवलं विद्वज्जना: अपितु साधारण जना: अपि संस्कृतम् अवदन्।

रामायण काले महाभारत काले च संस्कृतम् लोकानाम् व्यवहार-भाषा आसीत्। अशोकवाटिकायां हनुमान सीताम् प्रति वार्तालापमकुर्वन् संस्कृतम् आश्रितवान् 'वाचं चोदाहरिष्यामि मानुषीमिह संस्कृताम्'-वाल्मीकीये सुन्दरकाण्डे।

भारतीयाया: संस्कृते: परिज्ञानाय

संस्कृत -ज्ञानं परमम् आवश्यकम् विद्यते। चत्वारो वेदा: संस्कृते लिखिता:। स्मृतिग्रन्था:, पुराणानि, दर्शनानि, काव्यानि, नाटकानि च सर्वाणि संस्कृते लिखितानि सन्ति।

भौतिकं सुखं तृणीकृत्य ब्रह्मज्ञानाय तत्परा: देवाराधने रता: भारतीया: संस्कृतस्य अनुशीलनमकुर्वन्।

पाश्चात्या: विद्वांस: संस्कृतवाङ्मये निहितान् आदर्शान् ज्ञातुम् विदेशेभ्य: भारतम् प्रति आगच्छन् संस्कृताध्ययनम् च अकुर्वन्।

अधुना स्वतन्त्रा: वयम्। पराधीनता काले यदि संस्कृतं पराभूतं संजातम् तर्हि स्वतन्त्रे राष्टे उन्नयनम् अस्य परमम् आवश्यकम्। इयम् भाषा अस्माकं राष्ट्रभाषा हिन्दीभाषाया: जननी। संस्कृतस्य उत्थानेन हिन्दीभाषाया: अपि अभ्युदय: सम्भवति।

नवीने युगे नवदिशा संस्कृतस्य उन्नति: विधेया:। सुकुमारमतीनां छात्राणां कृते संस्कृत व्याकरणस्य सरलीकरणं समीचीनम्। प्राच… विशालं समृद्धंच संस्कृत वाङ्मयम् पठनीयम्। सरलता सरसता च गुणद्वयं महाकवे: कालिदासस्य सर्वासु रचनासु पाठकान् अनुरंजयति। विविधै: निष्णातै: कविभि: कृतानि काव्यानि सहृदयान् आकार्षन्ति। यथा नारिकेलफलसंमितं भारवेर्वच:।"'मेघेमाघे गतं वय:", "माघे सन्ति त्रयो गुणा:", "उदिते नैषधे काव्ये  क्व माघ:क्व भारवि:" इत्यादीनि वचनानि संस्कृतानुरागिणां संस्कृते स्नेहं दर्शयन्ति प्रतिपादयन्ति च।

अस्माकं धर्मग्रन्थ: गीता सर्वेभ्य: देशवासिभ्य: प्रेरणादायक: उपदेशप्रदश्च।

नूनं संस्कृताध्ययनम् अस्मान् सुसंस्कृतान् विदधाति - अतः उक्तम्-

यदि नो संस्कृता वाणी यदि नो संस्कृतं मन:।

यदि नो संस्कृता बुद्धि: संस्कृताध्ययनेन किम्।।

## कालिदास

**डॉ० देवेन्द्र पाल**

विशालं समृद्धंच सुरभारत्या: भाण्डारम्।नैके च माघभारविदण्डीभवभूति प्रभृतय: कवय:।परंच गीर्वाणवाणी प्रणयिनां हृदये कालिदासस्य नामैव कापि अधिकतरां प्रीतिमावहति। किं तत्र कारणम्? नूनं तस्य कृतीनां लालित्यं सरलत्वं सरसत्वंच एतादृशं वैशिष्ट्यम् यत् अन्यत्र न दृश्यते।

प्रसादगुण परिपूर्णा: तस्य रचना: सहृदयानां पाठकानां मनांसि हरन्ति।सर्वेभ्य: हृदयग्राह्या: भवन्ति। तासाम् भावा: प्रमुदिता: समालोचका: 'महाकवि' विभूषणेन तं विभूषयन्ति। 'कविषु कालिदास:' अपरा सूक्ति: तस्य लोकप्रियतां प्रतिपादयति।

जन्मना कं प्रदेशं स सुशुभे? का तस्य जननी ? क: तस्य जनकश्चासीत् इत्यादि विषय अद्यावधि निश्चेतुं न शक्यन्ते।एका जनश्रुति: सर्वेषु कर्णगोचरतामायाति ।तदानीं कापि विद्योत्तमानाम्नी विदुषी सर्वान् विदग्धान् पण्डितान् पराजितवती। लज्जिता: तदानीन्तना: विद्···

तेन उष्ट्र शब्दस्य 'उट्र' इत्युच्चारणं श्रुत्वा विद्योतमा तम् भर्त्सितवती।स: गृहं परित्यज्य विरक्तो भूत्वा महतीमुपासनाम् अकरोत्। सरस्वत्या:(अन्येषां मतेन काल्या:) प्रसादेन काव्यशक्तयासमन्वित: परां प्रसिद्धिम् लेभे।

गृहमागत्य भार्याम् प्रत्यागमनं सूचयितुम् "अनावृतकपाटं द्वारंदेहि" इत्थं कथितवान्। महदाश्चर्येण चकिता सा"अस्ति कश्चित् वाग्विशेष:?" एवमवादीत्।

तयैव प्रयुक्तेन प्रत्येकेन शब्देन काव्यं विरच्य स काव्य-प्रतिभामदर्शयत्। 'अस्ति' शब्देन कुमारसम्भवम् आरब्धवान्। हिमालयवर्णेनेन इदम् काव्यम् आरभ्यते।यथा-

अस्त्युत्तरस्यां दिशि देवतात्मा<br>
हिमालयो नाम नगाधिराज:।<br>
पूर्वापरौ तोयनिधी वगाह्य<br>
स्थित: पृथिव्यामिव मानदण्ड:।।

एकम् खण्डकाव्यम् 'मेघदूतम्' अपि महाकवि: व्यरचयत्।तस्यारम्भ: 'कश्चित्' पदेन कृत:-

कश्चित्कान्ता विरहगुरुणा स्वधिकारात्प्रमत्त:,<br>
शापेनास्तंग···

पुनश्च रघो: महाराजस्य जन्मादारभ्य तत्रकुलोद्भ्वानाम् राज्ञाम् वर्णनम् दृश्यते। जगत: पितरौ कवि: आरम्भे एव वर्णयति स्वकीये 'रघुवंश' नाम्नि काव्ये। सरलमिदम् काव्यों चर्चितम् विदुषां समाजे 'रघुवंशमपि काव्यम्, तत्रापि टीका, सापि संस्कृते?'

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।<br>
जगत: पितरौ वन्दे पार्वतीपरमेश्वरौ।।

साहित्यस्य सर्वेषु अंगेषु तस्य अलौकिकी काव्यशक्ति: दृष्टिगोचरा भवति।

'अभिज्ञानशाकुन्तलम्' 'विक्रमोर्वशीयम्' 'मालविकाग्नि मित्रम्' तस्य नाटकेषु त्रीणि प्रसिद्धानि सन्ति।

यद्यपि 'उपमा कालिदासस्य' प्रसिद्धि: तथापि सर्वेषाम् अलंकाराणाम् प्रयोगे स: सिद्धहस्त:।बहुविधं तस्य काव्य नैपुण्यं वर्णयितुम् क: पारयति?

अस्तु उपसंहराम:।अविद्यमानोऽपि कालिदास: अद्यावधि यशसा जीवति जीविष्यति सर्वदैव च पिपठिषूनाम् हृदयमाह्लादयन्।

जयन्ति ते सुकृतिनो रससिद्धा कवीश्वरा:।<br>
नास्ति येषां यश: काव्ये जरामरणजं भयम्।।<br>
भवति तस्मिन् सत्या चरितार्था भणिति:।

**उद्यम**

**डॉ० देवेन्द्र पाल**

नानाविधाभिः समस्याभिः परिपूर्णेऽस्मिन् जीवने साफल्यं कथं लभ्यम् ? नूनं उद्यमेनैव तल्लभ्यम्। अस्तु -

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः।
नहि सुप्तस्य सिंहस्य मुखे प्रविशन्ति स्वयं मृगाः।।
एतादृशी सूक्तिः। आलस्यं परित्यज्य सततं यतमानः जनःकार्ये सफलः भवति। 'कार्यम् वा साधयामि, शरीरं वा पातयामि' यदा एतादृशो दृढ़निश्चयो भवेत् तदैव वयम् सफलाःभवितुम् शक्नुमः।

लोके त्रिविधाः जनाः दृश्यन्ते।एके नीचाः ये तु विध्नभयेन कार्यमेव न आरभन्ते। मध्यमास्तु आयाते विध्ने कार्य -विरताः भवन्ति। परंच उत्तमाः जनाःआयातेषु विविधविध्नेष्वपि कार्यं पूर्णं विदधत्येव। कथितंच -

प्रारभ्यते न खलु विध्नभयेन नीचैः,
प्रारभ्य विध्नविहिता विरमन्ति मध्याः।
विध्नैः पुनः पुनरपि प्रतिहन्यमानाः,
प्रारभ्य चोत्तमजनाः न परित्यजन्ति।।
'आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः' यथोक्तं तत् सत्यमेव। अतः आलस्यं विहाय अस्माभिः उद्योगशीलैर्भाव्यम्। सोत्साहेन कार्यरताः पुरुषाःसिंहसदृशाः पराक्रमशालिनः भवन्ति। त एव लक्ष्मीम् लभन्ते। प्रबोधयति नीतिकारः अस्मान्-

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी,
दैवेनदेयमिति का पुरुषा वदन्ति।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या,
यत्ने कृते यदि न सिद्धयति कोऽत्रदोषः।।
अस्माकं पूर्वजैः मनीषिभिः बहुमूल्यानि जीवन सूत्राण्युपदिष्टानि यथा-
उद्यमः साहसं धैर्यम् शक्तिः बुद्धिपराक्रमः।
षडेते यत्र विद्यन्ते तत्र देवो सहायकृत्।।
उपर्युक्तानि वचनानि अनुसृत्य वयं जीवने अवश्यमेव मनोरथाः भवेम। एतेष्वपि उद्यमस्यैव प्राधान्यम्।

प्रकृति अस्मान् उद्योगं शिक्षयति। निरन्तरं वायुः वाति। सूर्यः प्रातः उदेति।आदिनं प्रकाशमानः सायंमेव अस्तमेति। वयम् स्वेषु कर्तव्येषु तत्पराः भवेम एवमेव…

सूर्योदयात् पूर्वमेव उत्थाय कृषकः दिनपर्यन्तं क्षेत्रेषु श्रमं करोति। सूर्यातपे,वर्षतौं,शीते च कम्पमानः सः श्रमात् न विरमति। उत्पादयति च अन्नम् अस्मभ्यम् अन्येभ्योः प्राणिभ्यश्च। अस्माकं धार्मिक-ग्रन्थे गीतायाम् भगवता श्रीकृष्णेन वीर-अर्जुनाय यदुपदिष्टम् तस्य तत्त्वम् कर्मणि निहितम्। यथा -

कर्मण्येवाधिकारस्ते माफलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सड्गऽस्त्वकर्मणि।।
नैक प्रकारेण उद्यमस्य महिमानमवर्णयन् कविवराः।यथा -
उत्साहसम्पन्नमदीर्घसूत्रम्
क्रियाविधिज्ञं व्यसनष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदंच
लक्ष्मी स्वयं मार्गति वासहेतोः।
अलमेतावता वर्णनेन। उद्योगमाहात्म्यम् निश्चप्रचम्।